SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# शान्तरसस्य स्थायीभावनिर्णये सांख्यदर्शनस्य सापेक्षता

**śāntarasasya sthāyībhāvanirṇaye sāṃkhyadarśanasya sāpekṣatā**

**Vaskar Das**
Research Scholar, Dept. of Sanskrit
Ramakrishna Mission Vidyamandira
Belur Math, Howrah, West Bengal, India
Email: das98vaskar@gmail.com

**Abstract:** अलंकारशास्त्रे रसस्य प्रधान्यं प्रायः सर्वैरेव स्वीक्रियते प्रत्यक्षरूपेण परोक्षरूपेण वा। अस्य रसस्योत्पत्तिविषये यथा विदां मतपार्थक्यं विद्यते तथैव अस्य संख्याविषयेऽपि आलंकारिकेषु विवादः दृश्यते। सर्वादौ आद्याचार्येण भरतेन तस्य नाट्यशास्त्रे रसस्य अष्टविधत्वं स्वीक्रियते। किन्तु अभिनवगुप्तेन तस्य अभिनवभारत्यां शान्तस्य रसत्वं स्वीक्रियते। ततः मम्मटादि आचार्या अपि शान्तस्य रसत्वं स्वीकुर्वन्ति। किन्तु शास्तस्य रसत्वस्वीकृतेऽपि तस्य स्थायीभावविषये आलंकारिकेषु वैमत्यं दृश्यते। तेषु कोऽपि तत्त्वज्ञानमेव शान्तस्य स्थायीभावरूपेण स्वीकरोति तथा केनापि शममेव शान्तस्य स्थायीभावरूपेण कथ्यते। किन्तु ये निर्वेदस्य स्थायीभावत्वं स्वीकुर्वन्ति तेषां मतानां बहुप्रकारेण खण्डनं भवति। अभिनवगुप्तेनैव सर्वादौ निर्वेदस्य स्थायीभावत्वमस्वीकृत्य तस्य खण्डनं क्रियते, तस्मिन् खण्डनकाले स्वमतस्य पुष्टिवर्धनाय अभिनवगुप्तेन सांख्यमतस्योल्लेखः क्रियते प्रमाणरूपेण। विषयेऽस्मिन् विस्तारेण आलोचना मम शोधपत्रे विद्यते। अतः अत्र सांख्यदर्शनस्य सापेक्षता विद्यते। पुनः अभिनवगुप्तेन शान्तरसस्य प्रकृतित्वं स्वीक्रियते तथा अन्यानां रत्यादिभावानां विकारत्वं स्वीक्रियते। साधारणतः प्रकृतिविकृतेः धारणा सांख्ये प्राप्यते। अतः अत्रापि सांख्यस्य प्रभावः द्रष्टुं शक्नोमि। अनेन प्रकारेण शान्तस्य रसत्वनिर्णये स्थायीभावनिर्णये वा सांख्यदर्शनस्य प्रत्यक्षरूपेण परोक्षरूपेण वा प्रभावः द्रष्टुं शक्यते इति सारः।

**Keywords:** प्रकृतिविकृतिः, स्थायीभावः, सञ्चारीभावाः, शमः, निर्वेदः, तत्त्वज्ञानम्।

रसः हि नाट्यस्य प्रमुखः तत्त्वम्। अभिनवगुप्तानुसारेण रसः हि नाट्यम्। नाटकस्य पूर्णरूपेण अनुभूतिः रसेनैव जायते। रसं विना नाट्ये कोऽपि अर्थः प्रवर्तयितुं नार्हति। विषयेऽस्मिन् भरतेनापि उच्यते यत्– न हि रसादृते कश्चिदर्थः प्रवर्तते इति। अस्य रसस्य माहात्म्यं न केवलं नाट्ये काव्ये दृश्यते दर्शनग्रन्थेषु उपनिषत्स्वपि विषयेऽस्मिन् आलोचना प्राप्यते। तैत्तीरियोपनिषदि जगतः मूलभूतं तत्त्वमेव रसरूपेण अभिधीयते । तद्यथा–

'रसो वै सः। रसं ह्येवायं लब्धानन्दी भवति'॥[1] इति।

ततः वृहदारण्यकोपनिषदिऽपि रसनेन्द्रियग्राह्यं मधुरादि रसादिमतिरिच्य आस्वाद्यरूपार्थेनैव रसस्य प्रयोगः दृश्यते । तद्यथा–

'यद्वै तन्न रसयते रसयन्वै तन्न रसयते, नहि रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वान्न, तु तद्वितीयमस्ति ततोऽन्यद्विभक्त यद्रसयेत्'[2]। इति।

अर्थात् दर्शनशास्त्रेषु उपनिषदादारभ्यः न्यायादिदर्शने यथा रसविषयकम् आलोचनं प्राप्यते तथैव काव्यशास्त्रमध्येऽपि रसविषयकं विस्तारेण आलोचनं दृश्यते। उपनिषद्वद् काव्यशास्त्रमध्येऽपि रसमेव सारभूततत्त्वरूपेण मन्यते। तत्कारणाय काव्यशास्त्रस्य अधिकांशैराचार्यैः रसस्य काव्यात्मत्वं स्वीक्रियते। किन्तु अस्य रसस्य निष्पादनं केन प्रकारेण भवति इति विषये भरताचार्यस्य प्रख्यातं सूत्रमस्ति। तद्यथा–

'विभावानुभावव्यभिचारीसंयोगात् रसनिष्पत्तिः'॥[3] इति।

अस्मिन्नेव रससूत्रे स्थितः संयोगस्तथा निष्पत्तिरिति पदद्वयमधिकृत्य विदुषां मतपार्थक्यं विद्यते। ते सर्वे एव भारतीयदर्शनमाधारीकृत्यैव स्व स्व व्याख्यानं कुर्वन्ति।

रसनिष्पत्तिविषये आलोचनात् परं तस्य भेदविषये आलोचना क्रियते भरतमुनिना। भरतानुसारेण नाट्ये साधारणतः अष्टरसः भवितुमर्हति। तानि यथा– शृङ्गारः हास्यः, करुणः, रौद्रः, वीरः भयानकः, वीभत्साद्भुतश्चेति। भरतमुनिमते अष्टरसमिदमतिरिच्य इतररसस्य सम्भावना नास्ति। यद्यपि अभिनवगुप्तेन तस्य अभिनवभारत्यां शान्तनाम अपरस्येकस्य उल्लेखः क्रियते। न केवलमभिनवगुप्तेन तत्पश्चात् उद्भटाचार्येण तथा रुद्रटेनापि शान्तरसस्य निरूपणं क्रियते। उद्भटेन तस्य काव्यालंकारसंग्रहे उच्यते यत्–

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
वीभत्साद्भुतशान्ताश्च नव नाट्ये रसा स्मृताः॥"[4] इति।

मम्मटाचार्येणापि तस्य काव्यप्रकाशे शान्तरसस्य रसत्वमङ्गीक्रियते। प्रसङ्गेऽस्मिन् तदपि उल्लेखार्हम्–

'निर्वेदस्थायीभावोऽस्ति शान्तोऽपि नवमो रसः'[5]इति।

अत्र एतल्लक्षणीयं यत् रसभेदस्यालोचनाकाले प्रायः सर्वैरेव आलंकारिकैः येन क्रमेण रसस्य आलोचना क्रियते स तु प्रकृतपक्षे समानमेव। तैः सर्वैरेव आदौ शृङ्गाररसस्य उल्लेखः क्रियते। विषयेऽस्मिन् अभिनवगुप्तेन विस्तारेण आलोचना क्रियते कारणसहकारेण। पुरुषार्थचतुष्टयेषु सर्वादौ कामस्य प्रमुखं स्थानं विद्यते। अस्य कामस्य उपस्थितिः समग्रप्राणीमध्ये सामान्यरूपेण विद्यते। सुतरां अस्य कामस्य प्रकाशकः शृङ्गाररसस्य उल्लेखः सर्वादौ क्रियते आलंकारिकैः। ततः शृङ्गाररसस्यानुगामीरूपेण हास्यरसस्य द्वितीयं स्थानम्। अस्य हास्यरसस्य विरोधीरूपेण करुणरसस्य तृतीयं स्थानं भवति। ततःपरं करुणेन सह सम्बन्धवशतः करुणात् परमेव रौद्ररसस्य स्थानं भवति। रौद्ररसः साधारणः अर्थप्रधानः भवति। अतः इतः पूर्वे कामार्थयोः आलोचितत्वात् धर्ममूलकस्य वीररसस्य अवस्थानं भवति पञ्चमे स्थाने। अस्य वीररसस्य प्रयोजनं हि भीतजनं प्रति अभयप्रदानम्। अतः वीररसात् परमेव भयानकरसस्य वर्णना दृश्यते। भयानकविभावेन सह समविभावकारणात् भयानकात् परं वीभत्सरसस्य स्थानं भवति। ततः अद्भूतरसस्य स्थानं विद्यते।

अत्र त्रिवर्गस्य साधनभूतः मोक्षफलस्य साधकः शान्तरसस्य उल्लेखः भवति। विषयेऽस्मिन् अभिनवगुप्तमतं सविस्तरेण उल्लेखार्हम् –

"तत्र कामस्य सकलजातिसुलभतयाऽत्यन्तपरिचितत्वेन सर्वान्प्रतिहृद्यतेति पूर्वश्शृङ्गारः। तदनुगामी च हास्यः। निरपेक्षत्वात् तद्वीपरितः करुणः। ततस्तन्निमित्तं रौद्रः। स चार्थप्रधानः। ततः कामार्थयोर्धर्ममूलत्वात् वीरः। स हि धर्मप्रधानः। तस्य च भीताभयप्रदानसारत्वात्। तदनन्तरं भयानकः। तद्वीरेणाक्षिप्तम्। वीरस्य प्रयन्तेऽद्भूतः फलमित्यनन्तरं तदुपादानम्। तथा च वक्ष्यते पर्यन्ते कर्तव्यो नित्यं हि रसोऽद्भूतः। ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीत-निवृत्तिधर्मात्मको मोक्षफलः शान्तः। तत्र स्वात्मावेशेन रसचर्वणेत्युक्तम्"॥[6] इति।

अर्थात् भरतमते विभावानुभावव्यभिचारीभावेन सह स्थायीभावस्य संयोगवशतः रसस्य निष्पत्तिः भवति। तत्र विभावः कारणरूपस्तथा अनुभावः कार्यरूपः। यद्यपि अस्य विभावस्य आलम्बनोद्दीपनभेदेन भेदद्वयं भवितुमर्हति। ततः सञ्चारीभावविषये आलोचनीयम्। भरताचार्येण त्रयत्रिंशत्संख्यकाः सञ्चारीभावाः स्वीक्रियन्ते । तद्यथा—

"निर्वेदग्लानिशङ्काल्यास्तथासूया मदः श्रमः।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥
व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥
सुप्तं विवोधोऽमर्षश्चाप्यवहित्यमथोग्रता।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचरिणः।
त्रयत्रिंशदमी भावाः समाख्यातास्तु नामतः"॥[7] इति ।

अनेन सञ्चारीभावेन सह स्थायीभावस्य संयोगेनैव रसनिष्पत्तिः भवति। अधुना प्रश्नो भवितुमर्हति यत् स्थायीभावः कुत्र तिष्ठति? अस्य प्रश्नस्योत्तररूपेण उच्यते यत् प्रत्येकं व्यक्तेः हृदये चित्तवृत्तिरूपेण स्थायीभावाः तिष्ठन्ति। तन्मध्ये यः निरन्तररूपेण विद्यमानं तिष्ठति सः स्थायीभावः कथ्यते। पुनः यः अनियमितरूपेण अकस्मात् आगत्य प्रवहमानजीवनधारायाः गतिं परिवर्त्य पुनः गच्छति स तु सञ्चारीभावः। आचार्यभरतानुसारेण स्थायीभावः अष्टविधः भवति। न केवलं भरतेन मम्मटेनापि अष्टविधः स्थायीभावः स्वीक्रियते । तद्यथा –

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायीभावाः प्रकीर्तिता"॥[8]इति।

एवं अष्टप्रकारं स्थायीभावमतिरिच्य ये आलंकारिकाः शान्तरसस्य रसत्वं स्वीकुर्वन्ति ते सर्वे एव शान्तरसस्य स्थायीभावमपि स्वीकुर्वन्ति। मम्मटाचार्येण शान्तरसस्य स्थायीभावरूपेण निर्वेदस्य उल्लेखः क्रियते। यद्यपि अभिनवगुप्तस्तथा विश्वनाथादयः आलंकारिकाः शममेव शान्तरसस्य स्थायीभावरूपेण स्वीकुर्वन्ति।

केनापि आचार्येण मन्यते यत् नाट्ये अवस्थायाः अनुकरणं भवति इति सत्यं किन्तु शान्तरसे सर्वविषयाणां निवृत्तिः भवति, तत्कारणाय अवस्थानुकृतिरूपे नाट्ये शान्तरसस्य सम्भावना नास्ति। नाट्यः साधारणतः अभिनयप्रधानः भवति किन्तु शान्तरसः निवृत्तिप्रधानः। अतः निवृत्तिप्रधाने शान्तरसे रोमाञ्चादीनां अभावात् अभिनयः भवितुं नार्हति । अपि च गीतवाद्यादिना सह शान्तरसस्य विरोधः विद्यते। यथा नाट्यशास्त्रे उच्यते –

"न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः।
समः सर्वेषु भावेषु स शान्तः प्रथितो रसः" ॥[9] इति।

किन्तु अभिनवगुप्तानुसारेण नाट्ये शान्तरसस्यापि स्थितिरस्ति। तेन शान्तरसस्य अभिनेयत्वमपि स्वीक्रियते। तन्मते गीतवाद्यादीना सह नाटकस्य कोऽपि विरोधः नास्ति। अभिनवगुप्तमते रसेषु शान्तरसः हि मूलभूतः रसः। तेन केवलमेव शान्तरसस्यैव प्रकृतित्वं स्वीक्रियते। अन्यत् सर्वं विकृतिरूपेण मन्यते। तन्मते शृङ्गारादिरसाः स्वस्य हेतोः आश्रयमाध्यमेन शान्तरसादेव आविर्भूताः भवन्ति ततः निमित्तस्य अपायाद् परं पुनः तत्रैव विलीनः भवति। विषयेऽस्मिन् भरतमतमुल्लेखार्हम् –

"भावाः विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मम।
विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते॥
स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते" ॥[10] इति।

अनेन प्रकारेण भरतेन शान्तरस एव प्रकृतिरूपेण मन्यते। अन्ये रत्यादिभावाः विकृतयः। तत्कारणं हि विकारः प्रकृतादेव जातः प्रकृत्यामेव लीयते। यतः रत्यादिभावाः स्व स्वनिमित्तस्य आस्वाद्यत्वकारणात् शान्तरसादेवोत्पन्नं भवन्ति पुनः निमित्तस्य विनाशात् परं शान्तरसे एव विलीनं भवन्ति, ततः शान्तरसस्य प्रकृतित्वं कल्पयितुं शक्नोमि। न केवलमेतद् पर्यन्तं रत्यादिभावानां विकारावस्थापि स्वीकरणीयम्। प्रकृत्यादेव विकारः जायते इति विषये प्रमाणं प्राप्यते सांख्यकारिकायाम्। प्रसङ्गेऽस्मिन् तदपि उद्धरणीयम्—

"प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि" ॥[11] इति।

अस्मिन् कारिकायां केन प्रकारेण प्रकृतादेव पौर्वापर्यक्रमेण विकारमुत्पन्नं भवति तदेव दर्शयति ईश्वरकृष्णेन। कः प्रकृतिः कः विकृतिर्वा विषयेऽस्मिन् सांख्यकारिकामध्ये आलोचना विद्यते। तद्यथा—

"मूलप्रकृतेरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तः।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" ॥[12] इति।

अतः शान्तस्य प्रकृतित्वस्थापनाय भरताचार्येण येन प्रकारेण आलोचना क्रियते सा तु अधिकांशतया सांख्यनिर्भरः। तद्दृष्ट्या एतद् वक्तुमुचितं यत् शान्तरसस्य अस्याम् आलोचनायां

सांख्यादर्शनस्य प्रभावः विद्यते।

शान्तरसस्य स्थायाभावस्योपरि साक्षाद्दार्शनिकप्रभावः विद्यते न वा इति प्रश्नः क्रियते चेत् उत्तररूपेण वक्तुं शक्नोमि यत् अवश्यमेव अस्ति किन्तु तस्मादेव अधिग्रूपेण अस्ति तस्य स्थायीभावस्य निर्णयकाले। शान्तरसस्य स्थायीभावनिर्णये आचार्याणां मध्ये मतवैपरीत्यं विद्यते। तेषु रुद्रटः तत्त्वज्ञानमेव शान्तस्य स्थायीभावरूपेण कथयति तथा आनन्दवर्धनः तृष्णाक्षयसुखमेव शान्तस्य स्थायीभावरूपेण दर्शयति। ततः धनञ्जयादयः आलंकारिकाः शममेव शान्तस्य स्थायीभावरूपेण स्वीकुर्वन्ति। किन्तु ये आलंकारिकाः निर्वेदस्य स्थायीभावत्वं स्वीकुर्वन्ति तेषां मतस्य नानाप्रकारेण खण्डनं दृश्यते। यथा अभिनवगुप्तेन तस्य अभिनवभारत्यां निर्वेदस्य स्थायीभावत्वं खण्डयते। तेन सर्वादौ पूर्वपक्षिणां प्रश्नमुत्थाप्यते। तत्र पूर्वपक्षिणा मन्यते यत् तत्त्वज्ञानादेव निष्पन्नः निर्वेदः शान्तस्य स्थायीभावः भवति चेत् तत्त्वज्ञानमेव तत्र शान्तस्य विभावरूपेण ग्रहणीयम्। अधुना प्रश्नः भवितुमर्हति यत् मोक्षस्य कारणं हि वैराग्यं पुनः वैराग्यस्य कारणं तु तत्त्वज्ञानं, तर्हि तत्त्वज्ञाने विभावत्वं केन प्रकारेण सिद्धति? अस्यामवस्थायां तत्त्वज्ञाने विभावत्वं स्वीक्रियते चेत् वस्तुगत्या कारणस्य कारणमेव विभावरूपेण व्यवहारः भवति। तदर्थमेव अत्र अतिव्याप्तिदोषो भवति।

अस्योत्तररूपेण अभिनवगुप्तेन स्वमतं प्रकाश्यते। तन्मते विरक्तपुरुषस्य प्रयत्नत्वकारणादेव तन्मध्ये तत्त्वज्ञानमुत्पद्यते। अस्मात् तत्त्वज्ञानादेव पुरुषस्य मोक्षप्राप्तिर्भवति। अर्थात् आदौ पुरुषस्य वैराग्यं भवति ततःपरं तस्य तत्त्वज्ञानं भवति, न तु तत्त्वज्ञानादेव निर्वेदःभवति। अतः पूर्वपक्षिणा यः दोषो प्रदर्श्यते तस्य क्रमोऽपि न निर्भुलः। स्ववचनस्य पुष्ट्यर्थं अभिनवगुप्तेन अत्र सांख्यकारिकायाः कारिकामेकां उद्धृतम्। तद्यथा–

"वैराग्यात् प्रकृतिलयः, संसारो भवति राजसाद्रागात्।
ऐश्वर्यादिविघातो, विपर्यायात्तद्विपर्यासः"॥[13] इति।

अत्रापि द्रष्टुं शक्नोमि यत् आदौ वैराग्यं भवति ततः तत्त्वज्ञानम्। अर्थात् अत्र एतदेव प्रमाणितं भवति अभिनवगुप्तेनापि तन्मतस्य सिद्ध्यर्थं सांख्यदर्शनस्य उल्लेखः क्रियते। यद्यपि अत्र एतदपि सत्यं यत् अभिनवगुप्तेन अत्र निर्वेदस्य स्थायीभावत्वस्य खण्डनायैव एषालोचना क्रियते। अतः विषयोऽयं यथार्थरूपेण विश्लेषणात् परं वक्तुं शक्नोमि यत् शान्तरसस्य स्थायीभावनिर्माणे सांख्यदर्शनस्य प्रभावः अनेकांशे अस्त्येव। विषयेऽस्मिन् अभिनवगुप्तस्य मतमुल्लेखार्हम् –

"किञ्च निर्वेदो नाम सर्वत्रानुपादयताप्रत्ययः। वैराग्यलक्षणस्य प्रयुक्तोपयोगी। विरक्तो हि तथा प्रयतते यथा अस्य तत्त्वज्ञानमुकत्पद्यते। तत्त्वज्ञानादि मोक्षः। न तु तत्त्वं ज्ञात्वा निर्विद्यते निर्वेदाच्च मोक्ष इति। वैराग्यात् प्रकृतिलयः इति तु तत्रभवन्तः"॥[14] इति ।

## Endnotes

1. *तैत्तिरीयोपनिषद्* , सम्पा. स्मामी-गम्भिरानन्दः, पृष्ठासंख्या- ३२१
2. *वृहदारण्यकोपनिषद्* ,सम्पा. गूर्गाचरण-सांख्य-वेदान्त-तीर्थः, ४ , ३ , २५ .
3. *नाट्यशास्त्रम्* , सम्पा. पारसनाथ-द्विवेदी, पृष्ठासंख्या- ३४.
4. *काव्यालंकारसारसंग्रहः* ,सम्पा. ड. राममूर्ति-त्रिपाठी, पृष्ठासंख्या- ३५० .
5. *काव्यप्रकाशः* , सम्पा. झलकीकारः , पृष्ठासंख्या- ११७ .
6. प्रागेव , पृष्ठासंख्या- २० .
7. तदेव , पृष्ठासंख्या – २४ .
8. प्रागेव , पृष्ठासंख्या- १७२ .
9. प्रागेव , पृष्ठासंख्या - २०८ .
10. तत्रैव
11. *सांख्यकारिका,* सम्पा. नारायणचन्द्र-गोस्वामी, पृष्ठासंख्या- २०३.
12. तदेव , पृष्ठासंख्या – ३५.
13. तदेव, पृष्ठासंख्या-२८९ .
14. प्रागेव , पृष्ठासंख्या- २१२ .

## Bibliography


- भरतः। *नाट्यशास्त्रम्* । सम्पा. ड. पारसनाथद्विवेदी। वाराणसी : सम्पूर्णानन्दसंस्कृत विश्वविद्यालयः, १६१३।
- मम्मटः। *काव्यप्रकाशः(बालबोधिन्याख्यटीका)*। सम्पा. झालकीकरः। दिल्ली : परिमल-पाब्लिकेशन्स, २००८।
- उद्भट। *काव्यालंकारसारसंग्रह एवं लघुवृत्ति की व्याख्या* । सम्पा. ड. राममूर्ति त्रिपाठी। प्रयाग: हिन्दी साहित्य सम्मेलन , १९६६ ।
- भरतः। *नाट्यशास्त्रम्* । सम्पा. अञ्जलिका-मुखोपाध्यायः। कलकाता : संस्कृत-पुस्तक-भाण्डारः , २०१८.
- मिश्रः , वाचस्पति। *सांख्यतत्त्वकौमुदी* । सम्पा. श्रीनारायणचन्द्र-गोस्वामी, कलकाता : संस्कृत-पुस्तक-भाण्डारः, २०१८.
- *उपनिषद्ग्रन्थावली*, सम्पा. स्वामी गम्भिरानन्दः, कलकाता : उद्बोधनकर्यालयः, १९८९ .
- *वृहदारण्यकोपनिषद्* , सम्पा. दूर्गाचरण-सांख्य-वेदान्त-तीर्थः, उत्तर२४ परगना : देव-साहित्य-कुटिर-प्राइभेट-लिमिटेड, २०११.


-----